स्त्रियां ङीप् । "गावः सुरभिगन्धिन्यस्तथा गुग्गुलगन्धयः" भा० आनु० ७८अ० । सा च २मुरानामगन्धद्रव्ये अमरः । [गन्धिपत्रादयोऽप्यत्र ।

**गन्धिपर्ण** पु० गन्धि गन्धयुक्तं पर्णमस्य । सप्तच्छदे राजनि० ।

**गन्धेन्द्रिय** न० गन्धग्राहकमिन्द्रियम् शा० त० । घ्राणेन्द्रिये तच्च पृथिव्यंशोत्पन्नम् "पार्थिवो गन्धो गन्धेन्द्रियं सर्वमूर्त्तिसमूहो गुरुता चेति" सुश्रुतः । तस्य यथा पार्थिवता तथा मुक्तावल्यां समर्थितं यथा

"घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात् कुङ्कुमगन्धव्यञ्जकघृतवत् न च दृष्टान्ते स्वकीयरूपादिव्यञ्जकत्वादसिद्धिरिति वाच्यं परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात् न च नवशरावगन्धव्यञ्जकजलेनानैकान्तमिति वाच्यं तस्य सक्तुरसाभिव्यञ्जकत्वात् यद्वा परकीयेति न देयं वायूपनीतसुरभिभागस्य दृष्टान्तत्वसम्भवात् नच घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्रव्यञ्जकत्वात् तत्र व्यभिचार इति वाच्यं द्रव्यत्वे सति इति विशेषणात् ।" अधिकमिन्द्रियशब्दे उक्तम् । [जन्तुभेदे त्रिका० ।

**गन्धो(न्धौ)तु** पु० गन्धप्रधान ओतुः वा वृद्धिः । खट्टासे

**गन्धोत्कटा** स्त्री गन्धेन उत्कटा उग्रा । दमनकवृक्षे राजनि०

**गन्धोत्तमा** स्त्री गन्धेन उत्तमा उत्कृष्टा । मदिरायाम् अमरः

**गन्धोद** न० गन्धवासितमुदकं शा०त०वा उदादेशः । गन्धद्रव्यवासितजले "आसिक्तमार्गं गन्धोदैः" भाग०९।११।१८ । उदादेशाभावे गन्धोदकमप्यत्र गन्धयुक्तिशब्दे उदा० ।

**गन्धोपजीविन्** पु० गन्धं गन्धद्रव्यमुपजीवति उप+जीव–णिनि । गन्धवणिजि । "दन्तकाराः सूपकारा ये च गन्धोपजीविनः" रामा० अयो०८३।१ अ० ।

**गन्धोलि(ली)** स्त्री गन्ध–ओलि–वा ङीप् । शठ्याम् । ङीबन्तः । २भद्रमुस्तायाम् मेदि० ।

**गन्धोली** स्त्री गन्ध–अर्द्दने बा० ओलच् गौरा० ङीष् । वरटायां (वोलता) अमरः ।

**गभ** न० भग+पृषो० वर्णविपर्ययः । भगे । "आहन्ति गभे पसो निगल्गलीति धाका" यजु०२३।२२ "गभे भगे वर्णविपर्ययः" वेददी० "गभे मुष्टिमतंसयत्" २३।४।२४ "आहन्ति गभे पसो निगल्गलीति धाके" शत० ब्रा० १३।२।९।६ ।

**गभस्ति** पु० गम्यते ज्ञायते गम–ड गः विषयस्तं बभस्ति भासयति भस–क्तिच् । १किरणे, २सूर्य्ये च । ३स्वाहायां वह्निपत्न्यां स्त्री मेदि० वा ङीप् । "यथा राजन् ! क्षतीः सर्वाः सूर्य्यः पाति गभस्तिभिः" भा० व० १३३अ० । "निजवदनसलिलमयगभस्तिभिः सुधयति" भाग० ५।८।२७ । "गभस्तिधाराभिरिव द्रुतानि तेजांसि भानोः" भट्टिः । ४अङ्गुलीषु वध० ५बाह्वौ द्विव० निघण्टुः । "पृथू करस्ना बहुला गभस्ती" ऋ० ६।१९।३ । "भगस्ती बाहू" भा० । "आ रश्मयोः गभस्त्योः स्थूरयोः" २९।२ । "गभस्त्योः बाह्वोः" भा० ६पाणौ च "पाणी वै गभस्ती पाणिभ्यां ह्येनं पावयति" गभस्तिपूतनिरुक्तौ शत०ब्रा० ४।१।१।९ । "कृष्णोऽसुभ्यां गभस्तिपूतः" यजु० ७।१ । "गभस्तिभ्यां पाणिभ्यां पूतः" वेददी० ।

**गभस्तिनेमि** पु० गभस्तय एव चक्रं तस्य नेमिरिव । गभस्तिरूपचक्रमध्यस्थस्य सूर्य्यात्मनो नेमितुल्ये परमेश्वरे । "गभस्तिनेमिः सत्त्वस्थः" विष्णुस० । "गभस्तिनेमिः श्रीपद्मः" भा० शा० १३अ० विष्णुस्तुतिः ।

**गभस्तिपाणि** पु० गभस्तिः पाणिरिवास्य रसाकर्षणाय । सूर्य्ये हेमच० । गभस्तिकरादयोऽप्यत्र । गभस्तिहस्तशब्दे दृश्यम् ।

**गभस्तिमत्** पु० गभस्तयोभूम्ना सन्त्यस्य मतुप् । सूर्य्ये शब्दरत्ना० । तस्य सहस्रकिरणत्वात्तथात्वम् । "घनव्यपायेन गभस्तिमानिव" रघुः गभस्तयो नित्यं सन्त्यत्र नित्ययोगे मतुप् । २पातालभेदे न० शब्दर० । "आह्लादकारिणः शुभ्राः मणयो यत्र सुप्रभाः । दिवाकरश्मयो यत्र प्रभां तन्वन्ति नातपम् । शशिनश्च न शीताय निशि द्योताय केवलम्" विष्णुपुराणोक्तेः तस्य सर्वदा मण्यादिदीप्तिमत्त्वात् तथात्वम् ३द्वीपभेदे पु० गन्धर्वशब्दे दृश्यम् ।

**गभस्तिहस्त** पु० गभस्तयो हस्ता इव जलाकर्षणाय यस्य । सूर्य्ये त्रिका० । "सूर्य्यः किरणजालेन वायुयुक्तेन सर्वतः । जगतो जलमादत्ते कृत्स्नस्य द्विजसत्तम !" विष्णुपु० उक्तेस्तस्य किरणद्वारा जलाकर्षकत्वात् तत्किरणानां तस्य हस्ततुल्यत्वम् । [ सेतद्दिव्यमहःप्रदम्" काशीख० ।

**गभस्तीश** पु० काशीस्थे लिङ्गभेदे "गभस्तीशो महालिङ्ग-

**गभि** त्रि० गच्छति नीरमत्र गम–आधारे इन् भश्चान्तादेशः । गभीरे । "गभौ सञ्जते सनज–क्विप् गभिषज् गभीरस्थायिनि । "तेषां हि धाम गभिषक् समुद्रियम्" ऋ० ७।७।१ ।

**गभीका** स्त्री गभीरे कायति कै–क पृषो०रलोपः । (गाम्भार) वृक्षभेदे तस्याः फलम् अण् हरितक्या० तस्य लुप् तद्धित लुपि प्रकृतिलिङ्गता । गभीका तत्फले स्त्री ।